শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীভৃগুসংহিতোক্ত

# ॥শ্রীসুদর্শন কৱচম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রীসুদর্শন কৰচম্॥

প্রসীদ ভগৰন্ ব্রহ্মান্ সর্ৰমন্ত্রজ্ঞ নারদ!।
সৌদর্শনং তু কৰচং পৰিত্রং ব্রূহি তত্ত্বতঃ॥ ১॥

নারদ উৰাচ
শৃণুষ্ৰেহ দ্বিজশ্রেষ্ঠ! পৰিত্রং পরমাদভুতম্।
সৌদর্শনং তু কৰচং দৃষ্টাদৃষ্টার্থসাধকম্॥ ২॥

কৰচস্যাস্য ঋষির্ব্রহ্মা ছন্দোনুষ্টুপ্তথা স্মৃতম্।
সুদর্শনমহাৰিষ্ণুর্দেৰতা সংপ্রচক্ষতে॥ ৩॥

হ্রাং বীজং শক্তি রত্রোক্তা হ্রীং ক্রোং কীলকমিষ্যতে।
শিরসসুদর্শনঃ পাতু ললাটং চক্রনাযকঃ॥ ৪॥

ঘ্রাণং পাতু মহাদৈত্যরিপুরৰ্যাত্ দৃশৌ মম।
সহস্রারশ্শ্রুতিং পাতু কপোলং দেৰৰল্লভঃ॥ ৫॥

ৰিশ্বাত্মা পাতু মে ৰক্ত্রং জিহ্বাং ৰিদ্যামযো হরিঃ।
কণ্ঠং পাতু মহাজ্বালঃ স্কন্ধৌ দিৰ্যাযুধেশ্বরঃ॥ ৬॥

ভুজৌ মে পাতু ৰিজযী করৌ কৈটভনাশনঃ।
ষটকোণসংস্থিতঃ পাতু হৃদযং ধাম মামকম্॥ ৭॥

মধ্যং পাতু মহাৰীর্যঃ ত্রিণেত্রো নাভিমণ্ডলম্।
সর্ৰাযুধমযঃ পাতু কটিং শ্রোণিং মহাদ্যুতিঃ॥ ৮॥

সোমসূর্যাগ্নিনযনঃ ঊরূ পাতু চ মামকৌ।
গুহ্যং পাতু মহামাযো জানুনী তু জগতপতিঃ॥ ৯॥

জঙ্ঘে পাতু মমাজস্রং অহির্বুধ্ন্যঃ সুপূজিতঃ।
গুলফৌ পাতু ৰিশুদ্ধাত্মা পাদৌ পরপুরঞ্জযঃ॥ ১০॥

সকলাযুধসংপূর্ণো নিখিলাঙ্গং সুদর্শনঃ।
য ইদং কৰচং দিৰ্যং পরমানন্দদাযিনম্॥ ১১॥

সৌদৰ্শনমিদং যো ৱৈ সদা শুদ্ধঃ পঠেন্নরঃ।
তস্যার্থসিদ্ধিৰ্ৱিপুলা করস্থা ভৱতি ধ্রুৱম্॥ ১২ ॥

কূশ্মাণ্ডচণ্ডভূতাদ্যাঃ যে চ দুষ্টা গ্রহাসস্মৃতাঃ।
পলাযন্তেনিশং ভীতাঃ ৱর্মণোস্য প্রভাৱতঃ॥ ১৩ ॥

কুষ্ঠাপস্মারগুল্মাদ্যাঃ ৱ্যাধযঃ কর্মহেতুকাঃ।
নশ্যন্ত্যে তন্মন্ত্রিতাম্বুপানাত্ সপ্তদিনাৱধি॥ ১৪ ॥

অনেন মন্ত্রিতাং মৃতস্নাং তুলসীমূলসংস্থিতাম্।
ললাটে তিলকং কৃত্বা মোহযেত্ ত্রিজগন্নরঃ।
ৱর্মণোস্য প্রভাৱেন সর্ৱানকামানৱাপ্নুযাত্॥ ১৫ ॥

॥ ইতি শ্ৰীসুদৰ্শন কৱচং সমাপ্তম্॥